(1031) " पुंस अभिवर्धने " (X-चुरादिः-1638. सक. सेट्. उभ.)

'—अभिमर्दने' इति क्षीरस्वामी ।

पुंसकः-सिका, पुपुंसयिषकः-षिका; [1]पुन्-पुंसौ-पुंसः; [A]पुंसना, इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकगन्धयतिवत् (375) ज्ञेयानि । अस्योभयपदित्वात् शतरि पुंसयन्-न्ती, पुंसयिष्यन्-न्ती-ती, इति रूपे अधिके इति विशेषः ।

(1032) "पुस्त आदरानादरयोः" (X-चुरादिः-1590. सक.सेट्. उभ.)

'—दानादरयोः' इति धातुकाव्ये (3-20) पाठः ।

पुस्तकः-स्तिका, पुपुस्तयिषकः-षिका; [B]पुस्तितः, [2]पुस्तकम्, इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककुस्मयतिवत् (236) ज्ञेयानि । अस्योभयपदित्वात् शताऽपि भवतीति विशेषः । क्विपि, पुस्त्-पुस्तौ-पुस्तः इति रूपाणि इति विशेषः ।

(1033) "पूङ् पवने" (I-भ्वादिः-966. अक. सेट्. आत्म.)

पवनम्=शोधनम् ।

'श्नि पुनाति पुनीते स्ताम्, पवने पवते ङितः ।' (श्लो. 27) इति देवः ।

पावकः-विका, पावकः-विका, [3]पिपविषकः-षिका, पोपूयकः-यिका;
पविता-त्री, पावयिता-त्री, पिपविषिता-त्री, पोपूयिता-त्री;
— पावयन्-न्ती, पावयिष्यन्-न्ती-ती, — —
पवमानः, पावयमानः, पिपविषमाणः, पोपूयमानः;

---

1. 'नकारजावनुस्वारपञ्चमौ झलि धातुषु । सकारजश्शकारश्चेषाट्टवर्गस्तवर्गजः ॥' इति अभियुक्तोक्त्याऽत्रानुस्वारो नकारस्थानिकः । तेन क्विपि संयोगान्तलोपे नकारान्तं रूपं प्रथमैकवचने बोध्यम् ।
2. 'क्वुन् शिल्पिसंज्ञयोः—' (द. उ. 3-5) इति संज्ञायां क्वुन् ।
3. सन्नन्ते, उगन्तत्वेनेण्निषेधे प्राप्ते, 'स्मिपूङ्रञ्ज्वशां सनि' (7-2-74) इति नित्यमिट् । 'ओः पुयण्ज्यपरे' (7-4-80) इत्यभ्यासस्य इकारः । एवं सन्नन्ते सर्वत्र ज्ञेयम् ।

A. 'न रिफट्टयामि किमु चुम्बभिया स्थितोऽसि
किं पूलिताञ्चकृतपुंसनयाऽत्र पुंसाम् ॥' धा. का. 3.26.

B. 'बर्हादिमण्डितसुभण्डितविग्रहोऽसौ प्रच्छर्दितः किल बकेन च पुस्तितार्तिः ।' धा. का. 3.20.